# कुमारः भोजः

**कवेः बल्लालसेनस्य भोजप्रबन्धः संस्कृतसाहित्ये प्रसिद्धोऽस्ति। अस्मिन् ग्रन्थे धारानरेशस्य भोजस्य विद्वत्तायाः कविप्रियतायाः दानशीलतायाश्च वर्णनमस्ति। राजा भोजः मध्यकाले भारतस्य अद्वितीयः शासकः आसीत्। तस्योपरि लक्ष्म्याः सरस्वत्याश्च कृपा समानरूपेण आसीत्। ''अद्य धारा निराधारा निरालम्बा सरस्वती पण्डिताः खण्डिताः सर्वे भोजराजे दिवङ्गते'' इत्येषः भोजप्रबन्धस्य श्लोकः तस्य वैदुष्यम् अभिव्यनक्ति। गद्यशैल्यां लिखितात् एतस्मात् ग्रन्थात् सङ्कलितोऽयं पाठः छात्राणां कृते अतीव प्रेरणादायकः अस्ति।**

आदौ धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वृद्धत्वे भोज इति पुत्रः समजनि। स यदा पञ्चवार्षिकस्तदा पिता आत्मनो जरां ज्ञात्वा मुख्यामात्यानाहूय अनुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं वीक्ष्य विचारयामास-'यद्यहं राज्यलक्ष्मीभारधारणसमर्थं सोदरमपहाय राज्यं पुत्राय प्रयच्छामि' तदा लोकापवादः। अथवा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति, तदा दत्तमपि राज्यं वृथा, पुत्रहानिर्वंशोच्छेदश्च, इत्येवं विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मजं ददौ।

ततः क्रमात् राजनि दिवं गते सम्प्राप्त राज्य सम्पत्तिः मुञ्जो मुख्यामात्यं बुद्धिसागरनामानं व्यापारमुद्रया दूरीकृत्य तत्पदेऽन्यं नियोजयामास। ततो गुरुभ्यः पत्रं वाचयति।



ततः क्रमेण सभायां ज्योतिष्शास्त्रपारङ्गतः कोऽपि ब्राह्मणः समागत्य राज्ञे ''स्वस्ति'' इत्युक्त्वा उपविष्टः। स च आह - 'देव! लोकोऽयं मां सर्वज्ञं वक्ति। तत्किमपि पृच्छ। ततो मुञ्जः प्राह - ''भोजस्य जन्मपत्रिकां विधेहि'' इति।

<u>ब्राह्मण-उवाच</u> - 'अध्ययनशालाया भोजः आनेतव्यः' इति। मुञ्जः भोजं भटैरानयामास। ततः साक्षात्पितरमिव राजानमानम्य सविनयं तस्थौ। भोजं निरूप्य राजानं प्राह दैवज्ञः - राजन्! भोजस्य भाग्योदयं वक्तुं विरञ्चिरपि नालम्। किञ्चित् तथापि वदामि स्वमत्यनुसारेण -

*पञ्चाशत् पञ्च वर्षाणि, सप्तमासदिनत्रयम्।*
*भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः॥ इति॥*

तदाकर्ण्य राजा चातुर्यादुपहसन्निव सुमुखोऽपि विच्छायवदनोऽभूत्। सोऽचिन्तयत् - यदि राज्यलक्ष्मी: भोजकुमारं गमिष्यति तदाहं जीवन्नपि मृत: । एवं विचिन्तयन् राजा सायङ्काले वत्सराजमाकार्य सौधं च निर्जनं विधाय वत्सराजं प्राह - ''त्वया भोजो भुवनेश्वरी विपिने हन्तव्य: प्रथमे यामे निशाया: शिरश्चान्त: पुरमानेतव्यम्'' इति। वत्सराज: नृपं नत्वा प्राह - ''देवादेश: प्रमाणम्। तथापि किमपि वक्तुकामोऽस्मि, देव ! पुत्रवध: क्वापि न हिताय'' इति। राजा कुपित: प्राह - त्वमेव राज्याधिपति: न तु सेवक: ।

ततो वत्सराज: 'कालोचितमालोचनीयम्' इति मत्वा तूष्णीं बभूव । वत्सराज: भोजं रथे निवेश्य खड्गमपकोशं कृत्वा जगाम महामायाभवनम्। प्रदोषकाले महामाया भवनमासाद्य प्राह भोजम् - ''कुमार ! राज्ञा भवद्वध: आदिष्ट:'' । इति ।

ततो भोज: वटवृक्षस्य पत्रमादायैकं पुटीकृत्य जघां छुरिकया छित्वा तत्र पुटके रक्तमारोप्य तृणेन एकस्मिन् पत्रे कञ्चन श्लोकं लिखित्वा वत्सं प्राह - ''महाभाग ! एतत् पत्रं नृपाय दातव्यम्। त्वमपि राजाज्ञां विधेहि'' इति। तत: प्राण परित्याग समये भोजस्य दीप्यमानां मुखश्रियमवलोक्य वत्सराज: 'कुमार ! क्षमस्व' इत्युक्त्वा प्रणम्य च भोजं रथे निवेश्य तमसि गृहमानीय भूमिगृहान्तरे च निक्षिप्य तं रक्षितवान्। कृत्रिमविद्याविद्भिश्च भोजकुमारमस्तकं कारयित्वा तच्चादाय राजभवनं गत्वा राजानं च नत्वा प्राह - ''श्रीमता यदादिष्टं तत्साधितम्'' इति।

राजा च पुत्रवधं ज्ञात्वा तमाह - ''वत्सराज ! खड्गप्रहार समये तेन पुत्रेण किमुक्तम्'' इति।

वत्सराजस्तत्पत्रमदात्। राजा पत्राक्षराणि वाचयति -

*मान्धाता च महीपति: कृतयुगालङ्कारभूतो गत: ।*
*सेतुर्येन महोदधौ विरचित: क्वासौ दशास्यान्तक: ॥*
*अन्ये चापि युधिष्ठिर प्रभृतयो याता दिवं भूपते ।*
*नैकेनापि समं गता वसुमती मुञ्ज त्वया यास्यति ॥*

राजा च तदर्थं ज्ञात्वा शय्यातो भूमौ पपात । ततश्च ससंज्ञो भूत्वा ''मा मां स्पृश, हा-हा पुत्रघातिनम्'' इति विलपन् द्वारपालानानाय्य 'ब्राह्मणानानयत' इत्याह। तत: स्वाज्ञया समागतान्ब्राह्मणान्नत्वा 'मया पुत्रो हत: तस्य प्रायश्चित्तं वदध्वम्' इति वदन्तं ते तमूचु: - ''राजन् ! सहसा वह्निमाविश'' इति। तत: समेत्य बुद्धिसागर: प्राह - 'यथा त्वं राजाधम:, तथैव अमात्याधमो वत्सराज:। तव किल राज्यं दत्वा सिन्धुलनृपेण तेन त्वदुत्सङ्गे भोज: स्थापित:। तच्च त्वया पितृव्येणान्यत्कृतम्। ततो राजमरण-वार्तां श्रुत्वा वत्सराज: सभागृहमागत्य प्राह - ''तात मया भोजराजो रक्षित:'' इति। ततो 'भोजो जीवित:' इति वार्ता च समभूत्। ततो गजेन्द्रारुढो बन्दिभि: स्तूयमान: कुमार: राजभवनमगात्। तत: सन्तुष्टो राजा निज सिंहासने तस्मिन्निवेशयित्वा तस्मै राज्यं ददौ। परलोकपरित्राणो मुञ्ज: निज पट्टराज्ञीभि: सह वनं गत्वा परं तपस्तेपे, भोजभूपालश्च राज्यं पालयामास।

## शब्दार्थ:

आदौ - पुरा। समजनि - अजायत। व्यापारमुद्रया - कपटजालेन। नियोजयामास - स्थापयामास। विरञ्चि: - ब्रह्मा। सौधम् - प्रासादम्। तूष्णीम् - मौनम्। प्रदोषकाले - निशामुखे। दशास्यान्तक: - श्रीराम: (दशाननस्य घातक:)। वह्निम् - अग्निम्। अमात्य: - सचिव:। समभूत् - अजायत। वदध्वम् - कथयत।

## अभ्यासः

1. **एकपदेन उत्तरत –**
   (क) आदौ धारानगर्याः राजा कः ?
   (ख) मुञ्जः कस्य अनुजः ?
   (ग) मुञ्जः कम् आमत्यं व्यापारमुद्रया दूरीकृतवान् ?
   (घ) वत्सराजः खड्गमपकोशं कृत्वा रथेन कुत्र जगाम ?
   (ङ) कः राज्यं पालयामास ?

2. **एकवाक्येन उत्तरत –**
   (क) सभायां कः समागत्य राज्ञे 'स्वस्ति' इत्युक्त्वा उपविष्टः ?
   (ख) भोजः तृणेन किम् लिखितवान् ?
   (ग) वत्सराजः भोजं कुत्र निक्षिप्य रक्षितवान् ?
   (घ) वत्सराजः किं मत्वा तूष्णीं बभूव ?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत –**
   (क) सिन्धुलराजा पुत्रं बालं वीक्ष्य किं विचारयामास ?
   (ख) राजनि दिवं गते मुञ्जः किं कृतवान् ?
   (ग) मुञ्जः ज्योतिषूशास्त्रपारङ्गतं ब्राह्मणं किमुक्तवान् ?
   (घ) भोजः श्लोकं लिखित्वा वत्सं किं प्राह ?

4. **रिक्तस्थानानि पूरयत –**
   (क) तस्य वृद्धत्वे ........................... पुत्र समजनि।
   (ख) अध्ययनशालाया भोजः ....................... इति।
   (ग) देवादेशः ......................................।
   (घ) राजा तदर्थं ज्ञात्वा ............................ भूमौ पपात।
   (ङ) मुञ्जः ........................ सह वनं गत्वा परं तपस्तेपे।

5. **युग्ममेलनं कुरुत –**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | भोजप्रबन्धस्य रचनाकारः | मुञ्जः |
| (ख) | राजाधमः | वत्सराजः |
| (ग) | अमात्याधमः | बल्लालसेनः |
| (घ) | ज्योतिषशास्त्रपारङ्गतः | कुमारः भोजः |
| (ङ) | गजेन्द्रारूढः | ब्राह्मणः |

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**
   (क) सोदरमपहाय
   (ख) तदुत्सङ्गे
   (ग) इत्युक्त्वा
   (घ) विरञ्चिरपि
   (ङ) सेतुर्येन

7. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत -**

(क) सविनयम्

(ख) देवादेश:

(ग) महोदधि:

(घ) गजेन्द्रारूढ:

(ङ) राजाधम:

8. **प्रकृतिप्रत्ययौ पृथक् कुरुत -**

(क) दत्वा

(ख) आनेतव्य:

(ग) निरूप्य

(घ) आदिष्ट:

(ङ) रक्षितवान्

9. **अधोलिखितशब्दानाधृत्य वाक्यानि रचयत -**

क्रमेण, यदि, इति, तत:, यदा-तदा, अपि, मा, वृथा

10. **अधोलिखितवाक्यानि कथाक्रमानुसारेण लिखत -**

(क) मुञ्ज: भोजं भटैरानयामास।

(ख) तस्य वृद्धत्वे भोज: इति पुत्र: समजनि।

(ग) सिन्धुल संज्ञोराजा चिरं प्रजा: पर्यपालयत्।

(घ) एतत् पत्रं नृपाय दातव्यम्।

(ङ) भोज: वटवृक्षस्य पत्रमादाय पुटके रक्तमारोप्य एकस्मिन् पत्रे कञ्चन श्लोकं लिखितवान्।

(च) राजा पत्राक्षराणि वाचयति।

(छ) मुञ्ज: वनं गत्वा तपस्तेपे।

(ज) राजा शय्यातो भूमौ पपात।

11. **पाठे आगतयो: श्लोकयो: अन्वयं कुरुत।**

**योग्यताविस्तार: -**

- भोजस्य अन्या: कथा: पठत।
- विद्यालये कथाया: मञ्चनं कुरुत।